# संस्कृतम्

# EDUMATE

XII

# SANSKRIT
# SAHITHYA

Government of Kerala

DEPARTMENT OF EDUCATION

*Prepared by*

**State Council of Educational Research and Training (SCERT), Kerala**

**2017**

Vidyabhavan, Poojappura, Thiruvananthapuram Kerala-695 012.

Website: www.scert.kerala.gov.in

e-mail : scertkerala@gmail.com

*Prepared by:*
State Council of Educational
Research & Training (SCERT)
Poojappura, Thiruvananthapuram -12,
Kerala. E-mail:scertkerala@gmail.com

*Type setting by:*
SCERT Computer Lab.

©
Government of Kerala
Education Department
2017

# *आमुखम्।*

नवीनपाठ्यचर्यानुसारिणी पठनप्रवर्तनानि युष्माकं परिचितानि किल? निरीक्षणं, साजात्यवैजात्यविवेचनं, तारतम्यं, वर्गीकरणम्, उपसंग्रहणं, प्रश्नापग्रथनम् इत्यादिभिः निगमनरूपवत्करणम्, आशयरूपवत्करणं च प्रमुखं कार्यम्। पठनप्रवर्तनैः चिन्तानैपुण्याः प्रवर्धनं दृढीकरणं च उद्दिष्टम्। एवं रूपीकृतान्याशयानि नवीनावसरेषु प्रयोक्तुं छात्राः समर्थाः भवेयुः। मूल्यनिर्णयप्रवर्तनेषु प्रधानतया छात्राणां चिन्तानैपुणी प्रवर्धकानां प्रश्नानाम् अवसरम् अवश्यं दातव्यम्। केवलं हृदिस्थानां प्रश्नानामाधिक्यं पठनप्रक्रियायाः अन्तःसत्ताम् ऊनीकुर्यात्। अस्मिन् प्रश्नसञ्चये विविधाः नवीनाः प्रश्नमातृकाः दत्ताः सन्ति। एतस्याः अभ्यासः छात्राणां बहूपकारकः भवेत्। परिष्कृतस्य अस्य ग्रन्थस्य सम्यगुपयोगः छात्राणां पठनं आनन्ददायकं कर्तुं प्रभवेत् इत्याशास्ये।

शुभाशंसाः।

**डा.जे.प्रसादः**
**निदेशकः**
**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्।**

# Contents


एककम् - I - आशीर्वादः।

एककम् – II - विवेकिता।

एककम् – III - स्वतन्त्रता।

एककम् - IV - रमणीयता।

# विषयानुक्रमणिका ।

- पठनाधिगमाः

## प्रश्नसञ्चयः ।


### एककम्  - I – आशीर्वादः ।

१. विचित्ररूपोऽनुग्रहः ।

२. सन्तानगोपालम् ।

३. बृहत्त्रयी ।

### एककम् – II - विवेकिता ।

१. ज्ञानोदयः ।

२. मृच्छकटिकम् ।

### एककम् – III – स्वतन्त्रता ।

१. महितामृतम् ।

१. शक्तिं देहि ।

### एककम्  - IV - रमणीयता ।

१. दानमेव महीयते ।

२. प्रथमसमागमः ।

३. काव्यतत्वचिन्ता ।

# पठनाधिगमाः ।

## LEARNING OUTCOMES

१. स्त्रोत्रकाव्यानधिकृत्य लघुटिप्पणीं लिखति ।
२. श्लोकं सतालमालपति ।
३. गद्यक्रमं लिखति ।
४. नूतनपदानि शब्दकोशात् स्वीकरोति ।
५. संस्कृतवाक्यानि प्रादेशिकभाषायां विवर्तयति ।
६. पदविश्लेषणं करोति ।
७. आस्वादनटीकां लिखति ।
८. गद्यं वाचयति ।
९. स्ववाक्यैः आशयं लिखति ।
१०. कथायाः आस्वादनटीकां लिखति ।
११. कथां सम्भाषणरूपेण परिवरतयति ।
१२. जीवितमूल्यानि विविच्य लिखति ।
१३. रुपकं पठित्वा पात्राभिनयं करोति ।
१४. क्रियापुटं पूरयति ।
१५. काव्यं कविं चाधिकृत्य टिप्पणिं लिखति ।
१६. गीतयोः आस्वादनटीकां लिखति ।
१७. स्वातन्त्रमधिकृत्य चर्चते ।
१८. गीतम् आलपति ।
१९. गीताञ्जलिमधिकृत्य प्रभाषते ।
२०. महाकाव्येषु रघुवंशस्य प्राधान्यं लिखति ।
२१. अलङ्कारपद्धतिः तुलनां करोति ।

# एककम्  - I – आशीर्वादः ।

१. विचित्ररूपोऽनुग्रहः ।

२.सन्तानगोपालम् ।

३. बृहत्त्रयी ।

# १. विचित्ररूपोऽनुग्रहः।

I **सामान्यनिर्देशः** ........● यथोचितं योजयत।
II **पठनाधिगमः** ........● नूतनपदानि प्रत्यभिजानाति।
III **चिन्तानैपुणी** ........● कार्यकारण बन्धं विवेचयति ।

## प्रश्नपाठः।

यथोचितं योजयत। 5

| | | |
|---|---|---|
| प्रशमी | - | ब्राह्मणः |
| द्विजः | - | चिपिटकं। |
| उपायनं | - | निग्रहीतमनाः |
| पृथुकं | - | चित्तजयं। |
| मनोजयं | - | उपगारं। |

समयः ५ निमेषाः

मूल्यनिर्णयसूचकाः- एकैकस्य उचितोत्तरस्य कृते एकैकमङ्कः।

**आहत्य-५ अङ्काः।**

I **सामान्यनिर्देशः** ........● क्रियापदानि - अर्थेन सह योजयत।
II **पठनाधिगमः** ........● नूतनपदनि प्रत्यभिजानाति।
III **चिन्तानैपुणी** ........● कार्यकारण बन्धं विवेचयति ।

## प्रश्नपाठः।

यथोचितं योजयत। 5

| | | |
|---|---|---|
| ऊचे | - | प्राप। |
| निषेव्यते | - | उवाच। |
| आप | - | संव्यते। |
| अपश्यत् | - | बुबोध। |
| ज्ञातवान् | - | दृष्टवान्। |

समयः ५ निमेषः

मूल्यनिर्णयसूचकाः- एकैकस्य उचितोत्तरस्य कृते एकैकमङ्कः।

**आहत्य-५ अङ्कः।**

**I सामान्यनिर्देशः** ........● अधोलिखितवाक्यानि पठित्वा नारायणभट्टपादस्य जीवनचरितं क्रमीकरोतु।

**II पठनाधिगमः** ........● मेल्पुत्तूर नारायणभट्टपादस्य जीवनचरितमधिकृत्य लिखति।

**III चिन्तानैपुणी** ........● **आशयान् धारणाश्च रूपवत्करोति।**

## प्रश्नपाठः। 5

अधोलिखितवाक्यानि पठित्वा नारायणभट्टपादस्य जीवनचरितं क्रमीकरोतु।

- गुरुपवनपुरेशस्य विष्णोः चरितं **उपवर्ण्य** लिखितं काव्यं भवति नारायणीयम्।
- केरलीयसंस्कृतकविषु प्रमुखः भवति नारायणभट्टपादः।
- तस्य जन्म तु मलप्पुरं जिल्लायाम् मेल्पुत्तूर्नामके गृहे भवति।
- नारायणीयम्, प्रक्रियासर्वस्वम्, मानमेयोदयस्य मानभागः अनेकैः प्रबन्धाश्च तेन विरचिताः
- नारायणीये सहस्राधिकश्लोकाः सन्ति।

समयः ५ निमेषाः

मूल्यनिर्णयसूचकाः- **क्रमानुसारलेखनस्य कृते** पूर्णाङ्कः ।

**I सामान्य निर्देशः** ........● अधः प्रदत्तं सूचनामनुसृत्य मेल्पुत्तूर्नारायणभट्टपादमधिकृत्य एकां टिप्पणीं लिखत।

**II पठनाधिगमः** ........● मेल्पुत्तूर् नारायणभट्टपादस्य जीवनचरितमधिकृत्य लघुटिप्पणीं लिखति।

**III चिन्तानैपुणी** ........● आशयान् घारणाश्च रूपवत्करोति।

## प्रश्नपाठः। 6

**मेल्पत्तूर् नारायणभट्टपादस्य जीवनचरितमधिकृत्य लघुटिप्पणीं लिखत।**

सूचना -

○ केरलीय संस्कृतकविषु प्रमुखः भवति।

○ गुरुपवनपूरेशस्य चरितमुपवर्णयति।

समयः - ७ निमिषाः।

मूल्यनिर्णयसूचकाः- सूचनानुसरणलेखनाय - **२** आशयपूर्णतायैः - ४

**आहत्य-६ अङ्कः।**

I **सामान्य निर्देशः** ........● कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

II **पठनाधिगमः** ........● पाठभागं पठित्वा उत्तराणि लिखति।

III **चिन्तानैपुणी** ........● परिचितविषयमनुस्मरति ।

**प्रश्नपाठः।** 1

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

नारायणीस्य कर्ता कः ?

(मेल्पुत्तूर् नारायणभट्टतिरिः, भारविः, माघः)

**समयः** - १ निमेषः ।

**मूल्यनिर्णयसूचकाः** - उचितोत्तरस्य लेखनाय पूर्णाङ्कः ।

I **सामान्य निर्देशः** ........● - आस्वादनटीकां लिखत ।
II **पठनाधिगमः** ........● आस्वादनटीकां लिखति ।
III **चिन्तानैपुणी** ........● विशदीकरोति ।

**प्रश्नपाठः।** 6

अधः प्रदत्तस्य श्लोकस्य आस्वादनटीकां सूचनानुसारं लिखत ।

प्रपूजितं तं प्रियया च बीजितं
करे गृहीत्वाऽकथयः पुरा कृतम् ।
यदिन्दनार्थं गुरुदारचोदिदै-
रपवर्तुवर्षं तदमर्षि कानने ।।

(सूचनाः - आमुखम्, आशयम्, आस्वादनम् )

**समयः** - ८ निमेषाः ।

**मूल्यनिर्णयसूचकाः** - सूचनानुसृत्य लेखनाय(एकैकस्य) २ अङ्कौ ।

आहत्य २x३=६

I **सामान्य निर्देशः** .......● प्रशनानामुत्तराणि लिखत ।

II **पठनाधिगमः** .......● स्ववाक्यैः आशयं लिखति ।

III **चिन्तानैपुणी** .......● परिचितविषयमनुस्मरति ।

**प्रश्नपाठः।** 5

श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत ।

कुचेलनामा भवतः सतीर्थ्यतां
गतः स सान्दीपनिमन्दिरे द्विजः ।
क्ष्वदेकरागेण धनादिनिस्पृहो
दिनानि निन्ये प्रशमी गृहाश्रमी ।।

प्रश्नाः -

१. कुचेलः कस्य मन्दिरं गतवान् ?

२. प्रशमी इति पदस्य अर्थं किं ?

३. श्लोकस्य आशयं स्ववाक्यैः लिखत –

**समयः** - ८ निमेषाः ।

**मूल्यनिर्णयसूचकाः** - प्रश्नस्स्योत्तरलेखनाय एकैकाङ्कः ।

आशयलेखनाय **३** अङ्कः ।

आहत्य **२+३=५**.

I **सामान्य निर्देशः** .......● अन्वयं लिखति ।

II **पठनाधिगमः** .......● गद्यक्रमं लिखति ।

III **चिन्तानैपुणी** .......● आशयान् धारणांश्च रूपवत्करोति

**प्रश्नपाठः ।** 4

श्लोकं पठित्वा गद्यक्रमं पूरयति।

भक्तेषु भक्तेन स मानितस्त्वया
पुरीं वसन्नेकनिशां महासुखम् ।
बतापरेद्युर्द्रविणं विना ययौ

विचित्ररूपस्तव खल्वनुग्रहः ।।

**गद्यक्रमः -** भक्तेषु ........ त्वया .......... सः एकां निशां पुरीम् ........... वसन् बत अपरेद्युः द्रविणं विना ययौ तव अनुग्रहः ........... खलु ।

विचित्ररूपस्तव खल्वनुग्रहः

**समयः -** ४ निमेषाः ।

**मूल्यनिर्णयसूचकः -** एकैकस्य पदस्य पूरणाय एकैकम् अङ्कम् ।

आहत्य १+१+१+१=४.

I **सामान्य निर्देशः** ........● इष्टतमश्लोकस्य लेखनम् ।

II **पठनाधिगमः** ........● आशयावगतिः ।

III **चिन्तानैपुणी** ........● विमर्शनबुद्ध्या चिन्तयति ।

**प्रश्नपाठः ।**

**अधप्रदत्तं श्लोकं पठित्वा भवतः इष्टतमश्लोकः कः इति सकारणं लिखत ।** 5

१. प्रपूजितं तं प्रियया च वीजितं
करे गृहीत्वाऽकथयः पुराकृतम् ।
यदिन्धनार्थं गुरुदारचोदितै-
रपर्तुवर्षं तदमर्षि कानने ॥

२. त्रपाजुषोऽस्मात् पृथुकं बलादथ
प्रगृह्य मुष्टौ सकृदाशिते त्वया ।
कृतं कृतं नन्वियतेति सम्भ्रमात्
रमा कोलोपेत्य करं रुरोध ते ॥

३.     भक्तेषु भक्तेन स मानितस्त्वया
पुरीं वसन्नेकनिशां महासुखम् ।
बतापरेद्युर्द्रविणं विना ययौ
विचित्ररूपस्तव खल्वनुग्रहः ।।

**समयः -** ८ निमेषाः ।

**मूल्यनिर्णयसूचकाः - श्लोक चयनस्य कृते** २अङ्कौ।

**कारण लेखनाय** ३ अङ्काः।

आहत्य-**३**+**२**=**५**.

# २. सन्तानगोपालम्।

I **सामान्य निर्देशः** ........ कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।
II **पठनाधिगमः** ........ पाठभागस्याशयग्रहणम्।
III **चिन्तानैपुणी** ........ प्रत्यभिजानाति।

**प्रश्नपाठः।**

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत। 1

१. "शृणुत शृणुत सर्वे पाण्डुसूनोः प्रतिज्ञां "- अत्र पाण्डुसूनुः कः?
(श्रीकृष्णः बलरामः अर्जुनः)

समयः — १ निमिषः।

मूल्यनिर्णयसूचकाः- उचित उत्तरस्य कृते एकः अङ्कः।

I **सामान्य निर्देशः** ........ अधः प्रदत्तं श्लोकं पठित्वा प्रश्नस्योत्तरं लिखत।
II **पठनाधिगमः** ........ गद्यक्रमं लिखति।
III **चिन्तानैपुणी** ........ स्वमतानुसारं व्याख्यायते।

**प्रश्नपाठः।** 5

अधः प्रदत्तं श्लोकं पठित्वा अर्जुनस्य प्रतिज्ञाम् अधिकृत्य एकां खण्डिकां लिखत।

श्रुणुत श्रुणुत सर्वे पाण्डुसूनोः प्रतिज्ञां
सदसि पुनरपत्यं भावि भूमीसुरस्य।
करधृतशरचाप पालयिष्यामि नो चेत्
सकलजनसमक्षं सन्निवेक्ष्ये हुताशम्।।

समय : 10 निमेषाः।

मूल्यनिर्णयसूचकाः- आशयपूर्णतायैः **३** अङ्काः- **भाषाशुद्ध्यर्थ- २** अङ्कौ।

**अहत्य-३+२=५**

I **सामान्य निर्देशः** ........ अधः प्रदत्तं श्लोकांशं पठित्वा प्रश्नानामुत्तराणि लिखत।
II **पठनाधिगमः** ........ पदविश्लेषणं करोति।
III **चिन्तानैपुणी** ........ सयुक्तिकं चिन्तयति।

## प्रश्नपाठः।

अधः प्रदत्तं श्लोकांशं पठित्वा प्रश्नानामुत्तराणि लिखत। 1

“नाहं शौरिर्न खलु मुसली नानिरुद्धो न साम्बो।”

अत्र **बलराम** इत्यर्थकं पदं चित्वा लिखत।

समय :- २ निमेषौ।

मूल्यनिर्णय सूचकाः - उचितोत्तरस्य कृते - १ अङ्कः।

I **सामान्य निर्देशः** .......● कः विभागे प्रदत्तमाशयं पठित्वा तदाशयप्रतिपादकं श्लोकं ‘ख’ विभागादुद्धृत्य लिखत।

II **पठनाधिगमः** .......● **आशयग्रहणपूर्वकम् श्लोकचयनम्।**

III **चिन्तानैपुणी** .......● सयुक्तिकं चिन्तयति।

## प्रश्नपाठः।

‘ क’ विभागे प्रदत्तमाशयं पठित्वा तदाशयप्रतिपादकं श्लोकं ‘ख’ विभागादुद्धृत्य लिखत। 4

**‘क’ विभागः।**

1. श्रीकृष्णः अर्जुनस्य अग्निप्रवेशं निरुद्धवान्।
2. श्रीकृष्णः अर्जुनस्य करं गृहीत्वा पश्चिमां **दिशं प्रति प्रतस्थे।**

**‘ख’ विभागः।**

१. प्रदक्षिणीकृत्य सुरेन्द्रसूना-

वह्नाय वह्नौ पतितुं प्रवृत्ते।

तदन्तरायं तरसाऽचिरांशुः

पीताम्बरः कृष्णघनस्तताान।।

२. विहितभुवनभद्रे वसुभद्रे धरित्री-

भरहरणविनिद्रे भूरिकारुण्यसान्द्रे।

न परमखिललोकाः द्वारवत्यां जगत्या-

मुदधतिवलयवत्यां हृष्टपुष्टाः बभूवुः।।

३. आलम्ब्य सख्युः करमम्बुजाक्षः

करेण भृत्यार्तिहरेण सद्य।

आशास्पदं गोकुलसुन्दरीणां

पाशाधराशाभिमुखः प्रतस्थे।।

समयः- ८ निमेषाः।

मूल्यनिर्णयसूचकाः - एकैकस्य उचितोत्तरस्य - २ अङ्कौ।

आहत्य २+२ = ४।

I **सामान्य निर्देशः** .......● उदाहृतानुसारं विश्लेषयत।
II **पठनाधिगमः** .......● पदविश्लेषणं करोति।
III **चिन्तानैपुणी** .......● सृजनात्मकतया चिन्तयति।

**प्रश्नपाठः।**

उदाहृतानुसारं विश्लेषयत। 1

१. रामः +अयम् - रामोऽयम्।

-----+------ - फल्गुनोऽयम्।

समयः १ निमेषः।

मूल्यनिर्णयसूचकाः - एकैकस्य उचितोत्तरस्य कृते एकैकमङ्कः।

२. पुनः + अस्ति - पुनरस्ति।

-----+------ - पुनरपतयम्।

३. रामः + स्वस्ति - रामस्स्वस्ति।

-----+------ - कृष्णस्स्वयम्।

I **सामान्य निर्देशः** .......● अधो प्रदत्तं सूचनामनुसृत्य सन्तानगोपालकथामधिकृत्या एकं प्रबन्धं लिखतु।

II **पठनाधिगमः** .......● चम्पूकाव्यं कर्तारं च अधिकृत्य लघुटिप्पणीं लिखत।

III **चिन्तानैपुणी** .......● आशयान् वर्गीकरोति।

## प्रश्नपाठः। 8

अधो प्रदत्तां सूचनामनुसृत्य सन्तानगोपालकथामधिकृत्य एकं प्रबन्धं लिखतु।

- एकस्य ब्राह्मणस्य अपत्याषटकं मृतम्।
- ब्रह्मणः राजानम् अधिक्षिपति।
- **ब्राह्मणस्य भाविनः अपत्यस्य संरक्षणं स्वयमेव कर्तुमिति प्रतिज्ञां अर्जुनः चकार।**
- नवमपुत्रमपि मृतं, तत्समये श्रीकृष्णः अस्यप्रश्नस्य परिहारमकरोत्।

समयः - **१५** निमेषाः।
मूल्यनिर्णयसूचकाः - सूचनानुसृतलेखनाय- **२** अङ्कौ।
आशयपूर्णतयैः - ४ अङ्काः।
**भाषाशुद्ध्यर्थं** - २ अङ्कौ।
आहत्य- ८ अङ्काः।

# ३. बृहत्त्रयी।

I **सामान्य निर्देशः** .......● कोष्ठकात् समुचितमुत्तरं निर्धाय लिखत।
II **पठनाधिगमः** .......● पाठभागं पठित्वा उत्तराणि लिखति।
III **चिन्तानैपुणी** .......● **परिचितविषयमनुस्मरति।**

## प्रश्नपाठः। 1

1. शिशुपालवधस्य अपरं नामधेयं किम्?
   (किरातार्जुनीयं, बृहत्रयी, माघं)

समयः- १ निमेषः।

मूल्यनिर्णयसूचकाः - उचितोत्तरलेखनाय **एकः** अङ्कः।

2. भारवेः विशेषणं किमस्ति?
   (छत्रभारविः, कविकुलगुरुः, कविश्रेष्ठः)
3. "विद्वदौषधम्" भवति - किम्?
   (माघं, नैषधं, किरातार्जुनीयं)
4. उपमा, अर्थगौरवं, पदलालित्यं इति त्रयो गुणाः युगपत् कस्मिन् वि**द्यन्ते**?
   (श्रीहर्षे, माघे, भारवौ)
5. "आनन्दलाञ्छनः" कविः कः?
   (माघः, भारविः श्रीहर्षः)

I **सामान्य निर्देशः** .......● यथोचितं योजयत।
II **पठनाधिगमः** .......● पठितान् आशयान् उचितसन्दर्भे प्रयुज्यते।
III **चिन्तानैपुणी** .......● सयुक्तिं चिन्तयति।

## प्रश्नपाठः।

यथोचितं योजयत। 4

| क | | ख |
|---|---|---|
| श्रीहर्षः | - | भारविः। |
| अर्थगौरवम् | - | आनन्दलाञ्छनः। |
| नैषधम् | - | माघः। |
| शिशुपालवधम् | - | विद्वदौषधम्। |

समयः - १ निमेषः।

मूलयनिर्णयसूचकाः - **एकैकस्य उचितोत्तरस्य एकैकमङ्कः।**

आहत्य- ४ अङ्काः।

I **सामान्य निर्देशः** .......● श्लोकस्याशयं मातृभाषायां लिखत।

II **पठनाधिगमः** .......● संस्कृतवाक्यानि प्रादेशिकभाषायां विवर्तयत।

III **चिन्तानैपुणी** .......● परिचितविषयमनुस्मरति।

## प्रश्नपाठः।

श्लोकस्याशयं मातृभाषायां लिखत। 5

उपमाकालिदासस्य
भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यम्
माघे सन्ति त्रयो गुणाः।।

समयः- ५ निमेषाः ।

मूल्यनिर्णयसूचकः- उचिताशयलेखनाय पूर्णाङ्काः।

I **सामान्य निर्देशः** .......● सूचनानुसारं लघूपन्यासं लिखत।

II **पठनाधिगमः** .......● अवगतान् आशयान् स्वमतानुसारं लिखति।

III **चिन्तानैपुणी** .......● सृजनात्मकतया चिन्तयति।

## प्रश्नपाठः।

सूचनानुसारं लघूपन्यासं लिखत। 8

विद्यालये संस्कृतसभायाः उद्घाटने मुख्यप्रभाषकः बृहत्त्रयीमधिकृत्य कानिचित् कार्याणि उक्तवान्। किरातार्जुनीयं, माघं, नैषधं - काव्यानां सविशेषताः, कर्तारः छत्रभारविः घण्डामाघः, नैषधं विद्वदौषधम्'' - इत्यादयः। सूचनामिमां अनुसृत्य बृहतत्रयीमधिकृत्य लघूपन्यासं लिखत।

समयः- १० निमेषाः।

मूल्यनिर्णयसूचकः - आशयव्यक्ततया लेखनाय पूर्णाङ्काः देयाः।

I **सामान्य निर्देशः** .......● लघुटिप्पणीं लिखत।

II **पठनाधिगमः** .......● पठितान् आशयान् संक्षिप्य टिप्पणीं लेखति।

III **चिन्तानैपुणी** .......● युक्त्यनुसारं व्याख्यानं करोति।

**प्रश्नपाठः।** 5

लघुटिप्पणीं लिखत।

भारविं, किरातार्जुनीयं च अधिकृत्त्य लघुटिप्पणीं लिखत।

समयः- **१०** निमेषाः।

मूल्यनिर्णयसूचकाः- आशयान् क्रोडीकृत्य लेखनाय पूर्णाङ्काः।

I **सामान्य निर्देशः** .......● अभिमुखभाषणं पूरयत।

II **पठनाधिगमः** .......● समभाषणं लिखति।

III **चिन्तानैपुणी** .......● अनुयोज्य पदान्युपयुज्य सम्भाषणांशान् पूरयति।

**प्रश्नपाठः।** 7

सुप्रसिद्धं संस्कृतसाहित्याचार्यं प्रति छात्रैः कृतस्य अभिमुखस्य प्रसक्तं भागं उचितरीत्या पूरयत।

छात्राः - आचर्यवर्य, नमोवाकम्

आचार्यः - .................कः विशेषः?

**प्रथमः छात्रः** - ................बृहत्त्रयीमधिकृत्य कानिचित्कार्याणि ज्ञातुं इच्छामः।

आचार्यः - शिशुपालवधं ............ ................. च बृहत्त्रयीति कथ्यते।

**द्वितीयः छात्रः** - ................ शिशुपालवधस्य, किरातार्जुनीयस्य, नैषधस्य च कर्तारः के?

आचार्यः - माघः - ............... ................. च अस्य रचयितारः ।

**तृतीयः छात्रः** - .................पञ्चमहाकाव्येषु बृहत्त्रयीं विहाय द्वे काव्ये के?

आचार्यः - ........................... ..................... ।

समयः- **५** निमेषाः।

मूल्यनिर्णयसूचकाः - उचितरीत्या स्वमतानुसारं पूरणाय पूर्णाङ्काः।

# एककम् – II - विवेकिता ।

१. ज्ञानोदयः ।

२. मृच्छकटिकम् ।

# ४. ज्ञानोदयः ।

I **सामान्य निर्देशः** ...... ● उदाहरणानुसारं विश्लेषयत।
II **पठनाधिगमः** .......● संश्लिष्टपदानि विश्लेषयति।
III **चिन्तानैपुणी** .......● कार्यकारणबन्धमवगच्छति।

**प्रश्नपाठः ।** 1

१. निष्णातः + अहम् - निष्णातोऽहम्

गन्तुमशक्तः +अपि - --------------

समयः- १ निमेषः।

मूल्यनिर्णयसूचकाः- सूचनानुसारलेखनाय पूर्णोऽङ्कः।

I **सामान्य निर्देशः** .......● कथास्तम्भानां क्रमीकरणम् ।
II **पठनाधिगमः** .......● आशयं क्रोडीकरोति ।
III **चिन्तानैपुणी** .......● विमर्शनबुद्ध्या चिन्तयति।

**प्रश्नपाठः ।**

कथास्तम्भानि क्रमीकरोतु । 5

- गुरुकुलम् उपगम्य कुमारः सर्वं वृत्तान्तं गुरुम् अश्रावयत्।
- विनयसम्पन्नः संवृत्तः मे सुतः पिता अवदत्।
- गुरुदक्षिणां दत्वा स्वभवनं प्रतिन्यवर्तत।
- सः अजपरिपालने श्रद्धालुः अभवत्।
- किमधीतवानिति पिता अपृच्छत्।

समयः- ७ निमेषाः।

मूल्यनिर्णयसूचकाः- **उचितरीत्या क्रमीकरणस्य कृते** पूर्णोऽङ्कः।

I **सामान्य निर्देशः** .......● समस्तपदम् उदाहरणानुसारं लिखत।
II **पठनाधिगमः** .......● क्रियापुटं पूरयति।
III **चिन्तानैपुणी** .......● नैपुणीसम्पादनम्।

## प्रश्नपाठः। 

2

समस्तपदम् उदाहरणानुसारं लिखतु ।

१. विद्यया सम्पन्नः - विद्यासम्पन्नः।

विनयेन सम्पन्नः - ------------

समयः- २ निमेषौ।

मूल्यनिर्णयसूचकाः- उचितोत्तरलेखनाय पूर्णोऽङ्कः।

I **सामान्य निर्देशः** ........● अधोदत्ते संभाषणे रिक्तस्थानानि पूरयति।

II **पठनाधिगमः** ........● कथां संभाषण रूपेण परिवर्तयति।

III **चिन्तानैपुणी** ........● अवगतान् आशयान् विविध व्यवहाररूपेण प्रकटयति।

## प्रश्नपाठः।

अधोदत्ते संभाषणे रिक्तस्थानानि पूरयतु। 4

गुरुः- पुनः प्रत्यागतः किम् य़

श्वेतकेतु - आम् गुरो मया----------।

गुरुः - पुनरागमनस्य कारणं किम् ?

श्वेतकेतुः -'पठितव्यं त्वया न पठितम्' इति मम पिता------------।

गुरुः -तव पितुः अभिप्रायं--------- एव।

श्वेतकेतु - मया किं--------।

गुरु - द्वावजौ आदाय वनं गच्छतु। यदा अजानाम् संख्या सहस्रतमम् उपन्मति - प्रत्यागच्छतु

(करणीयम्, **अवदत्** , कारण, प्रत्यागतम्, समीचीनम्, तदा)

समयः- ५ निमेषाः।

मूल्यनिर्णयसूचकाः- **एकैकस्य उचितोत्तरस्य एकैकमङ्कः**।

# ५. मृच्छकटिकम्।

I **सामान्य निर्देशः** ........● कोष्ठकात् उचितमुत्तरं निर्धाय लिखत।

II **पठनाधिगमः** ........● रूपकभेदानधिकृत्य टिप्पणीं लिखति।

III **चिन्तानैपुणी** ........● सयुक्तिकं चिन्तयति।

## प्रश्नपाठः । 1

१. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखति।

मृच्छकटिकं कस्मिन् रूपकविभागे अन्तर्भवति।

(नाटकं, प्रकरणम्, भाणं)

समयः - १ निमेषः।

मूल्यनिर्णयसूचकाः- उचितोत्तरस्य - **एकः** अङ्कः।

I **सामान्य निर्देशः** ........● श्लोकं पठित्वा दारिद्रस्य अवस्थां अधिकृत्य एकां खण्डिकां लिखत।

II **पठनाधिगमः** ........● स्ववाक्यैः आशयं लिखति।

III **चिन्तानैपुणी** ........● सयुक्त्यानुसारं व्याख्यानं करोति।

## प्रश्नपाठः । 5

श्लोकं पठित्वा दारिद्र्यस्य अवस्थां अधिकृत्य एकां खण्डिकां लिखत।

"सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम्।
सुखातु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति।।"

समयः - **५** निमेषाः।

मूल्यनिर्णयसूचकाः उचित आशयलेखनाय ५ अङ्काः।

I **सामान्य निर्देशः** ........● खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत।

II **पठनाधिगमः** ........● गद्यं वाचयति।

III **चिन्तानैपुणी** ........● आशयान् वर्गीकरेति।

## प्रश्नपाठः। 5

खण्डिकां पठित्वा प्रदत्तानां प्रश्नानां उत्तराणि लिखत।

विदूषकः - "भो! न गमिष्याम्यन्यः कोऽपि प्रयुज्यताम्। मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति। आदर्शगतेव छाया वामतो दक्षिणा दक्षिणातो वामा। अन्यच्चैतस्यां प्रदोषवेलायामिह राजमार्गे गणिका विटाश्चेष्टा राजवल्लभाश्च पुरुषाः संचरन्ति।
तस्मान्मण्डूकलुब्धस्य कालसर्पस्य मूषिक इवाभिमुखापतितो वध्य इदानीं भविष्यामि।
त्वमिहोपविष्टः करिष्यसि।

चारुदत्तः - भवतु! तिष्ठ तावत्। अहं समाधिं निर्वर्तयामि।"

प्रश्नाः -

1. आदर्शगता छाया कीदृशं भवति?
2. प्रदोषवेलायां राजमार्गे के सञ्चरन्ति?
3. 'तस्मान्मण्डूकलुब्धस्य' इति पदस्य पदच्छेदं कुरुत।

समयः - १० निमेषाः।

मूल्यनिर्णयसूचकाः- उचितोत्तर लेखनाय प्रथम द्वितीय प्रश्नस्य द्वे द्वे अङ्कौ।
तृतीय प्रश्नस्य उचित पदच्छेदस्य कृते एकः अङ्कः।

**आहत्य-२ +२+ १= ५**

**I सामान्य निर्देशः** ........● कथापात्रस्वरूपं निरूपयत।

**II पठनाधिगमः** ........● पात्रस्वरूपं निरूप्य लघुटिप्पणीं लिखति।

**III चिन्तानैपुणी** ........● सयुक्तिकं चिन्तयति।

## प्रश्नपाठः। 8

मृच्छकटिकं नाम नाटके चारुदत्तस्य अथवा विदूषकस्य कथापात्रस्वरूपं निरूपयत।

समयः - १० निमेषाः।

मूल्यनिर्णयसूचकाः - पात्रस्वरूपलखनाय ८अङ्काः।

**I सामान्य निर्देशः** ........● कोष्ठकात् उचितोत्तराणि चित्वा संभाषणम् पूरयत।

**II पठनाधिगमः** ........● कथां संभाषणरूपेण परिवर्तयति।

**III चिन्तानैपुणी** ........● अवगतान् आशयान् विविधव्यवहाररूपेण प्रकटयति।

## प्रश्नपाठः ।

कोष्ठकात् उचितोत्तराणि चित्वा संभाषणम् पूरयतु। 4

चारुदत्तः - सखे! मैत्रेय स्वागतम्।
विदूषकः - भो वयस्य ................।
चारुदत्तः - मैत्रय! तव हस्ते किञ्चिदस्ति वा?
विदूषकः - भवतां कृते एकः ............. ।
चारुदत्तः - प्रावारकः? केन दत्तं तत्?
विदूषकः - ते ................ चूर्णवृद्धेन।
चारुदत्तः - प्रियमित्रण! धन्यवादः मैत्रेय
विदूषकः - ................ ।
(प्रावारकः, धन्यवादः, स्वागतम्, प्रियमित्रेण)

समयः- ५ निमेषाः।

मूल्यनिर्णयसूचकाः- उचितोत्तरस्य पूरणाय एकैकोऽङ्काः।

**आहत्य-४**

I **सामान्य निर्देशः** .......● संभाषणांशान् मातृभाषायाम् अनुवादयत।
II **पठनाधिगमः** .......● संस्कृतवाक्यानि प्रादेशिकभाषायां विवर्तयति।
III **चिन्तानैपुणी** .......● ऊहं करोति भवयति च।

## प्रश्नपाठः ।

संभाषणांशान् मातृभाषायाम् अनुवादयतु। 6

विदूषकः -भोः किमिदं चिन्त्यते?
चारुदत्तः - वयस्य।
विदूषकः - वदतु।
चारुदत्तः - दुःखानुभवानन्तरं सुखं चेत् तत् अधिकतया शोभते।
विदूषकः - कथम्?
चारुदत्तः तत् अन्धकारेषु दीपदर्शनं इव भवति।

समयः - १० निमेषाः।

मूल्यनिर्णयसूचकाः- उचिताशयलेखनस्य कृते, एकैकस्य एकैकोऽङ्कः ।

आहत्य- ६ अङ्काः

I **सामान्य निर्देशः** ........● कोष्ठकात् उचितोत्तराणि चित्वा संभाषणम् पूरयत।

II **पठनाधिगमः** ........● विविच्य लिखति।

III **चिन्तानैपुणी** ........● परिचितविषयमनुस्मरति।

**प्रश्नपाठः ।** 3

१. चारुदत्तस्य प्रियमित्रं चूर्णवृद्धः तस्मै किं अयच्छत् ?
(पुस्तकानि, रूप्यकाणि, प्रावारकं )

२. ''दारिद्र्यात्मरणाद्धा मरणं मम रोचते,न दारिद्र्यम्।'' कस्येदम् वचनम् ?
(विदूषकस्य, चारुदत्तस्य, चूर्णवृद्धस्य)

३. ''निवासश्चिन्तायाः परिभवो वैरमपरम्''- श्लोकांशे 'शत्रुता' इत्यर्थे प्रयुक्तं पदं किम् ?
(वैरम्, निवासः, परिभवः)

समयः - ३ निमेषाः।

मूल्यनिर्णयसूचकाः- उचितोत्तरस्य लेखनाय एकैकोऽङ्काः।

आहत्य- ३ अङ्काः।

I **सामान्य निर्देशः** ........● कथापात्रस्वरूपं वर्णयत।

II **पठनाधिगमः** ........● पात्रस्वरूपं निरूप्य लघुटिप्पणीं रचयति।

III **चिन्तानैपुणी** ........● विमर्शनबुद्ध्या चिन्तयति।

**प्रश्नपाठः ।**

मृच्छकटिकं नाम नाटके चारुदत्तस्य कथापात्रस्वरूपं वर्णयत। 5

समयः - ५ निमेषाः।

मूल्यनिर्णयसूचकाः- आशयानुसार लेखनाय पूर्णोऽङ्कः।

# एककम् – III - स्वतन्त्रता ।

१. महितामृतम् ।

२. शक्तिं देहि ।

# ६. महितामृतम्।

**I सामान्य निर्देशः** .......● अधः प्रदत्तं श्लोकं सम्यक् पठत । प्रदत्तानां प्रश्नानामुत्तराणि च लिखत।

**II पठनाधिगमः** .......● पद्यं पठित्वा आशयम् अवगच्छति।

**III चिन्तानैपुणी** .......● परिचितविषयमनुस्मरति, आशयान् अवगच्छति, प्रकटयति च।

**प्रश्नपाठः।** 7

अधः प्रदत्तं श्लोकं सम्यक् पठत । प्रदत्तानां प्रश्नानामुत्तराणि च लिखत।

(क) यत्र वर्णपरिचिन्तनचण्डाः
प्रस्तृतासितविमर्दनदण्डाः।
निस्त्रपं सितिमभावितगोत्राः
वृद्धिमापुरतुलां सितगात्राः।।

1. सितगात्राः कीदृशाः आसन् ?
2. निस्त्रपं ते किमकुर्वन् ?
3. अतुलां वृद्धिमापुः। के ?
4. श्लोकस्याशयं स्ववाक्यैः लिखत।

समयः - १० निमेषाः

मूल्यनिर्णसूचकाः - उचितमुत्तरं लिखति चेत् एकैकोऽङ्काः।

आशयलेखनाय **अङ्कचतुष्टयं**।

**आहत्य-** ३+४=७ अङ्काः।

**I सामान्य निर्देशः** .......● 'क' विभागे प्रदत्तमाशयं पाठित्वा तदाशयप्रतिपादकं श्लोकं 'ख' विभागादुद्धृत्य लिखत।

**II पठनाधिगमः** .......● अन्योन्यं बन्धं ज्ञात्वा यथोचितं योजयति।

**III चिन्तानैपुणी** .......● कार्यकारणबन्धं अवगच्छति।

## प्रश्नपाठः। 2

‘क’ विभागे प्रदत्तमाशयं पाठित्वा तदाशयप्रतिपादकं श्लोकं ‘ख’ विभागादुद्धृत्य लिखत।

| **‘क’ विभागः** | | **‘ख’ विभागः** |
|---|---|---|
| 1. सत्कीर्तिः एव सर्वैः अभिलषणीया। | - | **मानुषेषु नियतोऽप्यवकाशो**<br>**नो निषिध्यत इति क्रमभंगः।**<br>**अस्मदीयजनविह्वलतां तां**<br>**श्रोतुमत्र बधिराः इव कर्णाः॥** |
| 2. श्वेतवर्णीयैः तिरस्कृतः इतीयं | - | **भारताः वयमुदञ्चितधैर्य**<br>व्यूहमाप्य **परिपन्थिजनेभ्यः।**<br>**मोक्तुमात्मगुणपुष्टियतध्वम्**<br>**कीर्तिरेव मनुष्वभिकाठ्या॥** |

**समयः - ३ निमेषाः।**

**मूल्यनिर्णयसूचकाः- उचितोत्तरयोजनाय पूर्णाङ्कः- २ अङ्कौ।**

I **सामान्य निर्देशः** .......● उदाहरणानुसारं विश्लेषयत।

II **पठनाधिगमः** .......● सांश्लिष्टपदानि विश्लेषयति।

III **चिन्तानैपुणी** .......● सन्धिं ज्ञात्वा पदविश्लेशणं करोति।

## प्रश्नपाठः। 3

उदाहरणानुसारं विश्लेषयत।

उदाः -

1. गर्वितसितैरपि- गर्वितसितैः + अपि।

सितगणैरिति-----------+----------

2. उदा नियतोऽपि = नियतः + अपि।

स्थापनेऽपि = -----------+-----------।

3. महतासौ = महता + असौ ।

बहुधासौ= -----------+-----------।

समयः = ३ निमेषाः।

मूल्यनिर्णसूचकाः - उचित संश्लिष्टपदलेखने **पूर्णाङ्कः**।

आहत्य-३x१ = ३।

I **सामान्य निर्देशः** .......● यथोचितं योजयत

II **पठनाधिगमः** .......● कार्यकारणबन्धं अवगच्छति, लिखति च ।

III **चिन्तानैपुणी** .......● **प्रत्यभिजानाति।**

**प्रश्नपाठः।** 4

| **क** | | **ख** |
|---|---|---|
| 1. सितगात्रः | - | निर्लज्जम्। |
| 2. कदर्थितचित्तः | - | तिरस्कृताः। |
| 3. तर्जिताः | - | पीडितहृदयः। |
| 4. निस्त्रपम् | - | श्वेतवर्णयुक्ताः। |

समयः - ३ निमेषः।

मूल्यनिर्णयसूचकाः - **एकैकस्य उचितोत्तरस्य एकैकमङ्कः।।**

आहत्य-१x४= ४

I **सामान्य निर्देशः** .......● कोष्ठकादुद्धृत्य उचितम् उत्तरं लिखत।

II **पठनाधिगमः** .......● प्रश्नानाम् उत्तराणि लिखति।

III **चिन्तानैपुणी** .......● परिचितविषयम् अनुस्मरति।

**प्रश्नपाठः।** 3

कोष्ठकादुद्धृत्य उचितम् उत्तरं लिखत।

१. के कृष्णवर्णयुक्तान् जनान् क्रूरं पीडयन्ति?

(श्वेतवर्णयुक्ताः, कृष्णवर्णयुक्ताः रक्षिपुरुषाः)

२. पारतन्त्र्यसाहितम् उच्चनीचत्वं किं नाशयति ?

(दुःखम्, सुखम्, आत्माभिमानम्)

३. विद्रोहशमनार्थं स्वशक्त्या किं करणीयम् ?

(भयचिकाः भवन्तु, पलायनं कार्यम्, सङ्घीभूय विघ्नभेदकाः भवन्तु)

समयः-३ निमेषाः।

मूल्यनिर्णयसूचकाः - एकैकस्य प्रश्नस्य एकैकोऽङ्कः।

**आहत्य-३**

# ७. शक्तिं देहि।

I **सामान्य निर्देशः** ........● समानाशयप्रतिपादकं श्लोकं चित्वा लिखत।
II **पठनाधिगमः** ........● काव्यं पठित्वा आशयम् अवगच्छति।
III **चिन्तानैपुणी** ........● उपसंहरति।

## प्रश्नपाठः। 2

"यत्र चिन्तायां सङ्कुचितत्वं न सम्भवति तत्र मनः जाग्रतां प्राप्नोति। एतदाशयप्रतिपादकं श्लोकं चित्वा लिखतु।"

अ) यत्र विनिर्भयमुदयति हृदयं
यत्रोदात्तो मूर्धोदेति।
यत्र प्रसरति परितो ज्ञानं
परमं स्वातन्त्र्यं विदधानम्।।

आ) सङ्कुचिताभिर्गृहभित्तभिरपि
यत्र न भिन्नं छिन्नं भुवनम्।
यत्र प्रादुःषन्ति च वाचः
परमार्थस्यागाधगुहातः ।।

समयः- ५ निमेषाः

मूल्यनिर्णयसूचकाः- उचितश्लोकस्य लेखनाय पूर्णाङ्काः।

I **सामान्य निर्देशः** ........● मातृभाषायां दत्तस्य श्लोकस्य संस्कृतानुवादं चित्वा लिखत।
II **पठनाधिगमः** ........● काव्यं पठित्वा आशयम् अवगच्छति।
III **चिन्तानैपुणी** ........● सयुक्तिकं चिन्तयति।

## प्रश्नपाठः। 2

अधः प्रदत्तस्य मलयालश्लोकस्य संस्कृतानुवादः चित्वा लिखतु

എവിടെ നിർഭയമാകുന്നു മാനസം
അവിടെ നില്ക്കുന്നു ശീർഷം സമുന്നതം
എവിടെ വിജ്ഞാനം സർവ്വ സ്വതന്ത്രമായ്
അവികലമായി വിരാജിപ്പൂ നിത്യവും.
അവിടെ മുക്തിതൻ സ്വർഗ്ഗരാജ്യത്തിലേക്ക്
എന്റെ നാടൊന്നുണരണേ ദൈവമേ.

अ)　　यत्र विनिर्भयमुदयति हृदयं
यत्रोदात्तो मूर्धोदेति।
यत्र प्रसरति परितो ज्ञानं
परमं स्वातन्त्रयं विदधानम्।।
स्वातन्त्र्यस्य स्वर्गे तस्मिन्
प्रतिबुध्येत पितर्मम राष्ट्रम्॥

आ)　　यत्र तान्तो यत्नो बाहू
परिपूर्णयायामयति।
यत्र हि युक्तिविचारमयी सा
नैव विनश्यति विमला तटिनी।
प्रेतप्राचीनाचारमये
मरुसैकतविस्तारे तिमिरे॥

समयः　- **५** निमेषाः

मूल्यनिर्णयसूचकः- उचितश्लोकं चित्वा लेखनाय पूर्णाङ्काः।

I **सामान्य निर्देशः** ........● लघुपन्यासं लिखत।
II **पठनाधिगमः** ........● पठितान् आशयान् स्ववाक्यैः लिखति।
III **चिन्तानैपुणी** ........● **अवगत** आशयान् विविध व्यवहाररूपेण परिवृत्य **प्रकटयति**।

## प्रश्नपाठः। 8

- विश्वप्रसिद्धस्य टागोर् महाभागस्य नोबल् - पुरस्कारेणादृता भवति गीताञ्जलिः। विद्यालय वार्षिकाघोषसमारोहे मुख्यप्रभाषकः आधुनिककाले गीताञ्जलिनामकस्य गन्थस्य प्रसक्तिं अधिकृत्य उक्तवान्। तस्य प्रभाषणस्य प्रसक्तांशाः प्रकोष्टे दत्तम्।

तत् सूचनाः क्रोडीकृत्य लघूपन्यासमेकं लिखतु।

सूचनाः-

- मनसः निर्भयत्वम् आवश्यकम्। स्वतन्त्रचिन्ता जागरितव्या।
- सङ्कुचितत्वचिन्ता त्यक्तव्या, स्वतन्त्रचिन्ता आवश्यकी।
- कठिनप्रयत्नं, युक्तिपूर्वकचिन्ताश्च अनिवार्याणि।
- स्वाभिमानः, निर्भयत्वं, स्वातन्त्र्यबोधः, विज्ञानार्जनं च अनिवार्यः।
- अनुनिमिषं विकसितायां चिन्तायां राष्ट्रं जागर्तुं शक्तिम् आवश्यकम्।
- सुखदुःखानि सोढुम् एवं दुःखितान् समाश्वासयितुं शक्तिः आनुवार्याः।

समयः - १० निमेषाः।

मूल्यनिर्णयसूचकाः - आशयान् क्रोडीकृत्य उचितरीत्या लेखनाय पूर्णाङ्काः।

I **सामान्य निर्देशः** .......● समानाशययुक्तां पङ्क्तीं चित्वा लिखत।
II **पठनाधिगमः** .......● काव्यं पठित्वा आशयं अवगच्छति
III **चिन्तानैपुणी** .......● काव्यस्य आशयं क्रोडीकरोति। सयुक्तिकं चिन्तयति।

## प्रश्नपाठः। 2

" **अस्माकं जीवितं भवनकोणेषु बन्धितं न भवेत्** " **अस्य आशययुक्तां पङ्क्तीं लिखत।**

- सङ्कुचिताभिर्गृहभित्तिरपि। यत्र न भिन्नं छिन्नं भुवनम्।
- स्वातन्त्र्यस्य स्वर्गे तस्मिन् प्रतिबुध्येत पितुर्मम शष्ट्रम्।
- मनश्च समुन्नयितुं शक्तिं मम देहि।

समयः - २ निमेषौ।

मूल्यनिर्णयसूचकाः - आशययुक्तायाः पङ्क्तेः चयनाय पूर्णाङ्काः देयाः।

I **सामान्य निर्देशः** .......● कोष्ठकादुचितमुत्तरं चित्वा लिखत।
II **पठनाधिगमः** .......● आशयावगतिः।
III **चिन्तानैपुणी** .......● परिचितविषयमनुष्मरति।

## प्रश्नपाठः।

कोष्ठकादुचितमुत्तरं चित्वा लिखतु। 1

१. गीताञ्जलिः नाम काव्यस्य कर्ता कः ?

( रवीन्द्रनाथटागोर् , मुतुकुलं श्रीधरः , कालिदासः)

समयः- १ निमेषः।

मूल्यनिर्णयसूचकाः- उचितोत्तरस्य कृते -१ अङ्कः।

# एककम्  - IV - रमणीयता ।

१. दानमेव महीयते ।

२. प्रथमसमागमः ।

३. काव्यतत्वचिन्ता ।

# ८. दानमेव महीयते ।

**I सामान्यनिर्देशः ............** कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।

**II पठनाधिगमः ............** महाकाव्यानि कर्तॄन् चाधिकृत्य लिखति ।

**III चिन्ताप्रक्रिया ..........** परिचितविषयमनुस्मरति ।

## प्रश्नपाठः । 1

कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।

1. वरतन्तुशिष्यः कः ?

( रघुः , कौत्सः , रामः )

समयः - 1 निमेषः

मूल्यनिर्णयसूचकाः - उचितोत्तरस्य लेखनाय एकोऽङ्कः ।

I सामान्यनिर्देशः ............ श्लोकं पठित्वा गद्यक्रमं पूरयत ।

II पठनाधिगमः ............ श्लोकस्य गद्यक्रमं लिखति ।

III चिन्ताप्रक्रिया ........ आशयान् धारणांश्च रूपवत्करोति ।

## प्रश्नपाठः

श्लोकं पठित्वा गद्यक्रमं पूरयत ।

तमध्वरे विश्वजिति क्षितीशं
निश्शेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥

अन्वयः - विश्वजिति………… निश्शेषविश्राणितकोषजातं ………… उत्पत्तविद्यः

वरतन्तुशिष्यः ………… गुरुदक्षिणार्थी तं………… ।

समयः - 5 निमेषाः

मूल्यनिर्णयसूचकाः - उचितोत्तरपूरणाय एकैकाऽङ्कः

आहत्य - 4 अङ्काः।

**I सामान्यनिर्देशः** ………… संवादांशान् कोष्ठकात् चित्वा लिखत।

**II पठनाधिगमः** ………… कथां संभाषणरूपेण परिवर्तयति।

**III चिन्ताप्रक्रिया** ………… सृजनात्मकतया चिन्तयति।

## प्रश्नपाठः

5

कौत्सः रघुमहाराजस्य राजधानिं अगच्छत्। ताभ्यां मिथः प्रवृत्तं संवादं संभाव्य लिखत।

राजा - प्रणामं कौत्स।

कौत्सः -………… महाराजन्।

राजा - ………… आगमनोद्देश्यम्?

कौत्सः - मम………… समाप्तः।

राजा - साधु। भवतां कृते अहं किं करणीयम्?

कौत्सः - राजन्………… दातुम् मम हस्ते किञ्चित् नास्ति।

राजा - ………… अलम्। समाश्वस्व समाश्वस्व।

( तव , चिन्तया , प्रणामम् , विद्याध्ययनं , गुरुदक्षिणां )

समयः - 5 निमेषाः।
मूल्यनिर्णयसूचकाः - उचितरीत्या पूरणाय - 5 अङ्काः।
आहत्य - 1x5=5

**I समान्यनिर्देशः** ………… अधोदत्तानि वाक्यानि कः कं प्रति वदतीति लिखत।

**II पठनाधिगमः** ………… स्ववाक्यैः आशयं लिखति।

**III चिन्ताप्रक्रिया** ………… आशयान् धारणांश्च रूपवत्करोति।

## प्रश्नपाठः । 2

अधोदत्तानि वाक्यानि कः कं प्रति वदतीति लिखत ।

" ऋषीणाम् अग्रणीः ते गुरुः कुशली अपि । "

समयः - 2 निमेषौ ।

मूल्यनिर्णयसूचकाः - सूचनानुसारं लेखने द्वौ अङ्कौ ।

I **सामान्यनिर्देशः ............** यथोचितं योजयत ।

II **पठनाधिगमः ............** श्लोकस्याशयं लिखति ।

III **चिन्ताप्रक्रिया ............** परिचितविषयमनुस्मरति ।

## प्रश्नपाठः । 5

यथोचितं योजयत ।

| क | | ख |
|---|---|---|
| 1. कौत्सः | - | विश्वजित् |
| 2. रघुः | - | आकर्ण्य |
| 3. अध्वरं | - | कार्यकारणज्ञः |
| 4. निशाम्य | - | क्षितीशः |
| 5. कृत्यवित् | - | वरतन्तु शिष्यः |

समयः - 6 निमेषाः ।

मूल्यनिर्णयसूचकाः - समीचीनोरत्तरस्य लेखनाय पूर्णाङ्कः ।

आहत्य- 1x5=5

I **सामान्यनिर्देशः ............** उपन्यासं लिखत ।

II **पठनाधिगमः ............** कालिदासस्य वर्णनारीतिम् अवगम्य वर्णनां करोति ।

III **चिन्ताप्रक्रिया ............** आशयान् धारणांश्च रूपवत्करोति ।

## प्रश्नपाठः । 8

अधो दत्तां सूचनमाधारीकृत्य कौत्सरघुसंवादमधिकृत्य एकमुपन्यासं लिखत ।

सूचनाः-

- कौत्सः रघुं प्रपेदे ।
- अतिथिं प्रत्युज्जगाम ।
- मे भक्तिरेव पुरस्तात् अगणयत् ।
- चतस्रः दश च कोटीः आहर
- कुबेरात् अर्थं संपाद्य ददाति ।

समयः - 10 निमेषाः ।

मूल्यनिर्णयसूचकाः - सूचनानुसारं लेखनाय पूर्णाङ्कः ।

I **सामान्यनिर्देशः** ............ अर्थं विवेचनं कृत्वा लिखति ।

II **पठनाधिगमः** ............ नूतनपदानि ज्ञात्वा नवीनसन्दर्भे प्रयुङ्क्ते ।

III **चिन्ताप्रक्रिया** .......... सयुक्तिकं चिन्तयति ।

## प्रश्नपाठः । 1

अनयोः श्रवणार्थकं पदं चित्वा लिखत ।

1. निशम्य - निशाम्य ।

समयः - 1 निमेषः

मूल्यनिर्णयसूचकाः - उचितोत्तरस्य - 1 अङ्कः

I **सामान्यनिर्देशः.** ........... अव्ययपदानि चित्वा लिखत ।

II **पठनाधिगमः** ............ अव्ययपदानि ज्ञात्वा नूतनसन्दर्भे प्रयुङ्क्ते ।

III **चिन्ताप्रक्रिया** .......... परिचितविषयमनुस्मरति ।

## प्रश्नपाठः । 6

पेटिकातः क्त्वान्त - ल्यबन्त - तुमुन्नन्ताव्ययपदानि चित्वा पट्टिकारूपेण लिखत ।

| |
|---|
| निशम्य,पठित्वा, गन्तुम् ,श्रुत्वा, कर्तुम् , आकर्ण्य ,वीक्ष्य, गत्वा |

समयः - 4 निमेषाः ।

मूल्यनिर्णयसूचकः - एकैकस्य उचितोत्तरस्य एकैकङ्कः ।

आहत्य- 6x1=6

I सामान्यनिर्देशः............ रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत ।

II पठनाधिगमः............ प्रश्नवाक्यानि रचयति ।

III चिन्ताप्रक्रिया............सयुक्तिकं चिन्तयति ।

## प्रश्नपाठः । 3

अधोरेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत ।

तमध्वरे विश्वजिति क्षितीशं

निश्शेषविश्राणितकोषजातम् ।

उपात्तविद्यो गुरुदक्षिणार्थी

कौत्सः प्रपेदे वरतन्तु शिष्यः ॥

समयः -5 निमेषाः ।

मूल्यनिर्णयसूचकः - एककस्य प्रश्नस्य - 1 अङ्कः

आहत्य - 3x1=3

I सामान्यनिर्देशः............ रेखाङ्कितपदस्य पर्यायपदानि लिखति ।

II पठनाधिगमः............ नूतनपदज्ञानं नूतनसन्दर्भे प्रयोगः च ।

III चिन्ताप्रक्रिया............ परिचितविषयमनुस्मरति ।

## प्रश्नपाठः । 1

प्रदत्तस्य वाक्येषु रेखाङ्कितपदस्य एकं पर्यायपदं लिखत ।

1. इत्थं द्विजेन द्विजराजकान्तिः ।

समयः - एक निमेषः ।

मूल्यनिर्णयसूचकः - उचितोत्तरस्य - 1 अङ्कः ।

**I** सामान्यनिर्देशः............ पदविश्लेषणं कुरुत ।

**II** पठनाधिगमः............ पदविश्लेषणं करोति ।

**III** चिन्ताप्रक्रिया............ सयुक्तिकं चिन्तयति ।

## प्रश्नपाठः । 2

प्रदत्तं पद्यभागं पठित्वा रेखाङ्कितपदानां पदच्छेदं लिखत ।

१. कोटीश्चतस्रो दश चाहरेति

समयः - 2 निमेषौ ।

मूल्यनिर्णयसूचकः - एकैकस्य उचितपदच्छेदस्य - एकैकोऽङ्कः ।

आहत्य - 1+1=2

# ९. प्रथमसमागमः।

**I सामान्य निर्देशः** ........ अधः प्रदत्तं गद्यभागं पठित्वा प्रदेशिकभाषायां परिवर्तयत।

**II पठनाधिगमः** ........ आशयावगतिः ।

**III चिन्तानैपुणी** ........ आशयान् अवगतविषयाश्च नूतनसन्दर्भे प्रयुङ्क्ते।

प्रश्नपाठः।

अधः प्रदत्तं गद्यभागं पठित्वा प्रदेशिकभाषायां परिवर्तयतु। 3

अथैकदा मधुमासदिवसेषु अम्बया सममिदमच्छोदं सरः स्नातुमभ्यागमम्। तत्तन्मनोहरोद्देशदर्शनं लोभाक्षिप्तहृदया तत्र तत्र सखीजनेन सह व्यचरम्। एकस्मिन् प्रदेशे वनानिलेनोपनीतम् अभिभूतान्यपरिमलम् अनाघ्रातपूर्वं कुसुमगन्धमभ्यिजिघ्रम्।

समयः - 8 निमेषाः।

मूल्यनिर्णयसूचकः- आशयपूर्णतायै - 3 अङ्काः ।

**I सामान्य निर्देशः ........** अधौ प्रदत्तां खण्डिकां पठित्वा क्त्वान्त - ल्यबन्त - तुमन्नन्ताव्यय पदानि चित्वा लिखत।

**II पठनाधिगमः** ........ अव्ययपदानां चयानम्।

**III चिन्तानैपुणी** ........ अर्थज्ञानपुरस्सरम् अव्ययानां वर्गीकरणम्।

**प्रश्नपाठः।** 3

अधोप्रदत्तां खण्डिकां पठित्वा क्त्वान्त - ल्यबन्त - तुमन्नन्ताव्यय पदानि चित्वा लिखतु।

संस्कृतं विश्वस्य प्राचीनतमा भाषा भवति। संस्कृतं पठित्वा सामाजिकः सभ्यतायाः संस्कृतेः च संरक्षणं कर्तुं प्रयत्नं कुर्वन्तु भवन्तः। भारतीयसंस्कृतिः तु संस्कृतभाषाम् अवलम्ब्य तिष्ठति।

समयः - 5 निमेषाः।

मूल्यनिर्णयसूचकाः- एकैकस्य उत्तरस्य एकैकाङ्कः।

आहत्य - $3 \times 1 = 3$

**I सामान्य निर्देशः** ........ पाठभागं पठित्वा उत्तराणि लिखतु ।

**II पठनाधिगमः** ........ गद्यरूपं पठित्वा आशयं अवगच्छति ।

**III चिन्तानैपुणी** ........ पठितपाठभागस्य आशयं चिन्तयति ।

**प्रश्नपाठः** 3

अधः प्रदत्तं गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

अथैकता पुण्डरीकः मधुमासदिवसेषु अम्बया सममिदमच्छोदं सरः स्नातुमभ्यागमम्। तत्तन्मनोहरोद्देशदर्शनलोभाक्षिप्तहृदया तत्र तत्र सखीजनेन सह व्यचरम्। एकस्मिन् प्रदेशे झटिति वनानिलेनोपनीतम् अभिभूतान्यपरिमलम् अनाघ्रातपूर्वं कुसुनगन्धमभ्यजिघ्रम् ।

क) पुण्डरीकः कुत्र अगच्छत् ?

ख) पुण्डरीकः केन सह व्यचरत् ?

ग) पुण्डरीकः किम् अभ्यजिघ्रम् ?

समयः - ५ निमेषाः

मूल्यनिर्णयसूचकाः - एकैकस्य प्रश्नस्य एकैकमङ्कः।

आहत्य-1+1+1 -3

I **सामान्य निर्देशः** .......● उदाहरणानुसारं पदच्छेदं कुरुत ।

II **पठनाधिगमः** .......● पदविश्लेषणं करोति ।

III **चिन्तानैपुणी** .......● सयुक्तिकं चिन्तयति ।

**प्रश्नपाठः**

पदच्छेदं कुरुत । 5

उदा - अथैकदा। अथ + एकदा ।

नैकदा .....+ ........ ।

समयः – 2 निमेषौ।

मूल्यनिर्णयसूचकाः – उचितरीत्या लेखनाय ।

अङ्काः - 2X 1 =5

I **सामान्य निर्देशः** .......● कथां संगृह्य लिखत।

II **पठनाधिगमः** .......● संक्षिप्य टीका लिखति ।

III **चिन्तानैपुणी** .......● उपसंहरति ।

**प्रश्नपाठः**

प्रदत्तं पाठभागं संगृह्य लिखत। 5

अथैकता मधुमासदिवसेषु अम्बया सममिदमच्छोदं सरः स्नातुमभ्यागमम्। तत्तन्मनोहरोद्देशदर्शनलोभाक्षिप्तहृदया तत्र तत्र सखीजनेन सह व्यचरम् । एकस्मिन् प्रदेशे झटिति वनानिलेनोपनीतम् अभिभूतान्यपरिमलम् अनाघ्रातपूर्वं कुसुनगन्धमभ्यजिघ्रम् । 'कुतोऽयम्' इत्युपारूढकुतूहला कतिचित्पदानि गत्वा अयुगमलोचनं वशीकर्तुकामं काममिव सनियमम् अतिमनोहरं सवयसा सह स्नानार्थमागतं मुनिकुमारमपश्यम् ।

तेन च कर्णावतंसीकृतां कुसुममञ्जरीमभिवीक्ष्य अस्या नन्वयं परिमलः इति मनसा निश्चित्य तं तपोधनयुवानम् ईक्षमाणाहं नवयौवनसुलभेन कुसुमायुधेन परवशीकृता अभवम् ।

समयः - 8 निमेषाः ।

मूल्यनिर्णयसूचकाः - सयुक्तिक आशयलेखनाय 4 अङ्काः ।

शीर्ष लेखनाय 1अङ्काः ।आहत्य -5

I **सामान्य निर्देशः** .......● समानार्थक पदानि चित्वा लिखत।

II **पठनाधिगमः** .......● आशयावगतिः ।

III **चिन्तानैपुणी** .......● प्रत्यभिजानाति ।

**प्रश्नपाठः**

प्रदत्तं गद्यभागे रेखाङ्कितपदानां समानार्थक पदानि कोष्ठकात् चित्वा लिखत। 3

तेन च कर्णावतंसीकृतां <u>कुसुममञ्जरी</u>मभिवीक्ष्य अस्या नन्वयं <u>परिमलः</u> इति मनसा निश्चित्य तं तपोधनयुवानम् <u>ईक्षमाणा</u>हं नवयौवनसुलभेन कुसुमायुधेन परवशीकृता अभवम् ।

(सुगन्धः , पुष्पशेखरम्, प्रेक्ष्यमाण )

समयः - 5 निमेषाः ।

मूल्यनिर्णयसूचकाः - एकैकस्य उचितोत्तरस्य एकैकमङ्कः।

आहत्य -3 X1 = 3

# १०. काव्यतत्त्वचिन्ता

I **सामान्य निर्देशः .......●** आचार्यान् स्वस्यालङ्कारपद्धतीं प्रति यथोचितं योजयत।

II **पठनाधिगमः .......●** अलङ्कारपद्धतीः विवेचयति।

III **चिन्तानैपुणी .......●** काव्यसौन्दर्यज्ञानाय विविधाः पद्धतीः जानाति।

प्रश्नपाठः। 5

यथोचितं योजयत।

| क | | ख |
|---|---|---|
| कुन्तकः | - | रसपद्धतिः। |
| क्षेमेन्द्रः | - | रीतिपद्धतिः। |
| भरतमुनिः | - | ध्वनिपद्धतिः। |
| आनन्दवर्धनः | - | वक्रोक्तिः। |
| वामनः | - | औचित्यपद्धतिः। |

समयः- 7 निमेषाः।

मूल्यनिर्णयसूचकाः- एकैकोत्तरस्य कृते एकैकमङ्कः।

आहत्य 5x 1=5

I **सामान्य निर्देशः .......●** 'क' विभागे प्रदत्तं कारिकां पठित्वा 'ख' विभागे दत्तं अलङ्कार पद्धतीं प्रति योजयता।

II **पठनाधिगमः .......●** अलङ्कारपद्धतीः तुलनं करोति।

III **चिन्तानैपुणी .......●** सयुक्तिकं चिन्तयति।

## प्रश्नपाठः।

5

### 'क' विभागः।

१. काव्यं ग्राह्यमलंकारात्।

२. विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः।

३. रीतिरात्मा काव्यस्य।

४. काव्यस्यात्मा ध्वनिः।

५. अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम्।

### ख विभागः।

१. ध्वनिपद्धतिः।

२. अलङ्कारपद्धतिः।

३. औचित्यपद्धतिः।

४. रसपद्धतिः।

५. रीतिपद्धतिः।

समयः - 10 निमेषाः।
मूल्यनिर्णयसूचकाः - एकैकस्योचितोत्तरस्य कृते एकैकमङ्कः।
आहत्य- 5x 1=5

I **सामान्य निर्देशः** ....... एकवाक्येन उत्तरयत।
II **पठनाधिगमः** ....... अलङ्कारपद्धतीः तुलनं करोति।
III **चिन्तानैपुणी** ....... परिचितविषयमनुस्मरति।

**प्रश्नपाठः।** 2

शब्दार्थौ सहितौ काव्यम्- कस्य मतमिदम्

समय - 3 निमेषाः

मूल्यनिर्णयसूचकाः - पूर्णवाक्येनोत्तरलेखनाय 2 अङ्कौ।

I **सामान्य निर्देशः .......●** अधः प्रदत्तां कारिकां पठित्वा मम्मटभट्टमते काव्यप्रयोजनं किमिति निरूपयतु।

II **पठनाधिगमः .......●** अलङ्कारपजद्धतीः तुलनं करोति।

III **चिन्तानैपुणी .......●** परिचितविषयमनुस्मरति।

**प्रश्नपाठः।**

अधः प्रदत्तां कारिकां पठित्वा मम्मटभट्टमते काव्यप्रयोजनं किमिति निरूपयतु। 4

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

समय :-5 निमेषाः।

मूल्यानिर्णयसूचकः - आशयपूर्णतायै पूर्णाङ्कः।

I **सामान्य निर्देशः .......●** अधो प्रदत्तां कारिकां पठित्वा काव्यलक्षणमाधिकृत्य एकां खण्डिकां लिखत।

II **पठनाधिगमः .......●** अलङ्कारपद्धतीः तुलनं करोति।

III **चिन्तानैपुणी .......●** मूल्यनिर्णयं करोति।

प्रश्नपाठः।

अधो प्रदत्तां कारिकां पठित्वा काव्यलक्षणमाधिकृत्य एकां खण्डिकां लिखत। 5

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।

समयः - 8 निमेषाः।

मूल्यनिर्णयसूचकः - आशयपूर्णतायै - 3, **भाषाशुद्ध्यर्थं** - 2

आहत्य - 3+2=5

I **सामान्य निर्देशः** ....● व्याख्यानं करोति।

II **पठनाधिगमः** ....● आशयावगतिः।

III **चिन्तानैपुणी** ....● युक्तनुसारं व्याख्यानं करोति।

**प्रश्नपाठः।**

अधोदत्तेषु पद्धतिषु एकं विशदयत। 3

(क) रीतिपद्धतिः।

(ख) ध्वनिपद्धतिः।

(ग) रसपद्धतिः।

समयः- ५ निमेषाः।

मूल्यनिर्णयसूचका :- उचितोत्तरस्य कृते पूर्णाङ्कः।